Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# रसभावयो: सम्बन्ध:

नर्मदा बेहेरा,
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालय:,
तिरुपति:, आन्ध्रप्रदेश:,भारतम्।



**Article Info**
Volume 4 Issue 1
Page Number: 61-64
**Publication Issue :**
January-February-2021
**Article History**
Accepted : 01 Jan 2021
Published : 08 Jan 2021

**सारांश:–** रस आस्वाद एव न आस्वाद्य: तथापि व्यवहारतो रसो ह्यास्वाद्यत इति प्रयुज्यते । रसानुभूतो विभावानुभावव्यभिचारिभावनां न पृथक्तया प्रतीतिरपि तु समन्वितानुभूति:। रसभावयो: अभिनिवृत्तये केषाञ्चिन्मतम् परस्परसम्बन्धात् अर्थात् रस– भावयो: सम्बन्दात् रसेभ्यो भावानां भावेभ्यों रसानां निवृत्ति: इति । परन्तु तथा न भवति । यतोहि दृश्यते हि भावेभ्यो भावानामभिनिवृत्तिरिति। रस: भावहीना न भवति, भावौऽपि न रसवर्जित: ।
**मुख्यशब्द:** – रस:, आस्वाद:, भाव:, अनुभूत:, भरत।

न हि रसादृते कश्चिदर्थ: प्रवर्त्तते इति आचार्य– भरतानुसारं रसं विना कश्चिदपि अर्थ: न प्रवर्त्तते , अतएव भरतेन सर्वप्रथमेव रससूत्रं प्रणीतम्– 'विभावानुभावव्यभिचारीसंयोगाद्रसनिष्पत्ति:'।

रस्यते आस्वाद्यते अनेन इति रस: । अर्थात् आस्वाद्यत्वं रसधर्म:। रस आस्वाद एव न आस्वाद्य: तथापि व्यवहारतो रसो ह्यास्वाद्यत इति प्रयुज्यते । रसानुभूतो विभावानुभावव्यभिचारिभावनां न पृथक्तया प्रतीतिरपि तु समन्वितानुभूति:। दर्पणाकारस्य मते रसस्वरुपम्–

**विभावेनानुभावेन व्यक्त: सञ्चारिण: तथा।**
**रसतामेति रत्यादि: भाव: सचेतसाम्।।**[1]

रत्यादेरालम्बनोद्दीपनाख्यकारणद्वयेन अनुभावेन तथा व्यभिचरिणा व्यञ्जनवृत्या प्रतिपादित: सहृदयानां रत्यादि: स्थायिभाव: रसस्वरूपतां प्राप्नोति। सत्वोद्रेक सति रसस्याविर्भाव, स च रसोऽखण्ड:। रस एव स्वाकारवदभिन्नत्वेनास्वाद्यते । साहित्यदर्पणे रसस्य आस्वाद्यनत्वम् अनेनप्रकारेण प्रतिपादितम्। यथा–

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मय:**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदर:।**
**लोकोत्तरचमत्कारप्राणा: कैश्चित् प्रमातृभि:**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रस:।।**[2]

1 साहित्यदर्पणे–3/9

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अर्थात् सत्त्वस्य गुणस्य उद्रेकात् , अखण्डः, स्वतः प्रकाशमानः आनन्दरुपः , चिन्मयःज्ञेयान्तरसम्पर्करहितः , ब्रह्मसाक्षात्कारसदृशः, अलौकिकाऽऽश्यर्यजीवनरूपः, कैश्चित् प्रमातृभिः स्वाकारवत् भेदरहितत्वेन अयं रसः आस्वाद्यते इति अर्थः।

मम्मटाचार्यस्य मते रसस्वरुपम्–

**कारणान्यथ कार्याणि सहकारीणि यानि च।**

**इत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।**

**विभावा अनुभावस्तत् कथ्यन्ते व्यभिचारिणः।**

**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।।** [3]

अर्थात् लोक व्यवहारे यानि कारणानि तानि विभावदवाच्यानि यानि अनुभावानि तानि कार्याणि, यानि सहकारीणि तानि सञ्चारीभावानि इति नाट्यकाव्ययो निबध्य.न्ते । तैः विभावाद्यैः व्यञ्जनावृत्या प्रतिपादितः स स्थायी भावः चित्तवृत्तिविशेषो रसः स्मृतः। वासनारुपतयाइति सूक्ष्मरुपेणावस्थिता इत्यादीन् स्थायिनो विभावयन्ति आस्वाद योग्यतां नयन्तीति विभावाःताननुभवविषयीकुर्वन्तीति अनुभावाः तान् विशेषेण कार्ये अभिचरयन्ति सञ्चारयन्ति इति व्याभिचारिण।

रसभावयोः सम्बन्धः–

**यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।**

**आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः।.** [4]

यथा हि नानव्यञ्जनौषधिद्रव्यसंयोणाद्रसनिष्पत्तिः तथा नानाभानोपवगमाद्रसनिष्पत्तिः । यथा गुडदीनां द्रव्यनां मधुरतिक्तदीनां व्यञ्जनानां, औषदिनाञ्च पाकरुपेण कुशलसम्पाद्यात् विलक्षणा षाडवादयो रसा रसनयोग्याः क्रियन्ते तथैव नानभूकैर्विभावादिरुप प्रत्यक्षकल्पनां गता लोकोपेक्ष या ये स्थिनो भावास्ते रसयनानतैकजीवितं रसत्वं तत्र प्रतिपद्यन्ते । प्राकरूपया सम्योजनया तावदलौकिको रसो जायते । तत्र च प्रधानत्वेन जलस्य रसाभिव्यञ्जकल्पमिति व्यञ्जनं विभावस्थानीयम् । चिञ्हारदिद्राद्यनुभावप्रात्यम्। द्रव्याणि तु गुडादीनि तत्र चिञ्चाहरिद्रधान्पादियोगाय युक्रमधुरादि विलक्षणरसो व्यभिचारिकल्पः।

**भावाभिनयसंम्बाद्वान्स्थायिभावांस्तथा बुधाः।**

**आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः।।**[5]

यथा सुमनसः पुरुषा नानव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति हर्षदीश्यधिगच्छन्ति तथैव नानभिनयव्यञ्जतान् बागङ्गसत्त्वोवेतान् स्थायिभावानास्वादयन्ति। सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति।

रसेभ्यो भावानामभिनिवृत्तिः भवति अथवा भावेभ्यो रसानामिति शङ्कायाः मोचनाय उच्यते–

**नानाभिनयसम्बद्धान्भावयन्ति रसानिमान्।**

---

[2] सा.द.3/2.3

[3] का. प्र. 4/27

[4] ना. शा. 6/32

[5] ना. शा. 6/33

**यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः।।[6]**

आङ्गिक-वाचिक- सात्त्विक आह्यार्यदिभि: नानाभिनयैः सम्यग्बद्धान् दृदयं गतान् भावयन्ति रसान् तस्माद्भावा इति नाटययोक्तृबिः विज्ञेया।

**नानद्रव्यैर्बहुविधैव्यञ्जनं भाव्यते यथा ।**

**एवं भावा भावयन्ति रसानभिनयैः सह ।।[7]**

यथा बहुभिधैः व्यञ्जनौषधिद्रव्यैः नाना व्यञ्जनं भाव्यते, तथैव आङ्गिकादिभिरभिनयैः सह भावा रसान् भावयन्ति इत्यर्थः।

**न रसो भावहीनोऽस्ति न भावो रसवर्जितः।**

**परस्परकृता सिद्धित्तस्तयोरभिनये भवेत्।।[8]**

**व्यञ्जनौषधिसंयोगो यथाऽत्रं स्वादुतां नयेत्।**

**एवं भावा रसाश्चैव भावयन्ति परस्परम्।।[9]**

व्यञ्जनौषधिसंयोगोऽभं च कर्त्तृ यथा परस्परमन्योन्यं कर्मभूतं स्वादुता नयेत् तथा भावा रसाश्चान्योन्यं बावयन्ति। भावा रसान्भावयन्ति, रसास्तु भावान् भावयन्ति । एकत्रैरुदा क्रियायामन्योन्याश्रयत्वं दोषो न तु क्रियाभेदे । तथा व्यञ्जनसुखयोग्यता क्रियते। एवं भावै रस्यमानता । रसैश्च विभावादिव्ययदेश्यता कारदीनाम्। यथा पटापेक्षया तन्तवः पटकारणमिति व्यपदेश्याः । तन्त्वपेक्षया पटः कार्यः।

रसभावयोः अभिनिवृत्तये केषाञ्चिन्मतम् परस्परसम्बन्धात् अर्थात् रस- भावयोः सम्बन्दात् रसेभ्यो भावानां भावेभ्यों रसानां निवृत्तिः इति । परन्तु तथा न भवति । यतोहि दृश्यते हि भावेभ्यो भावानामभिनिवृत्तिरिति। रसः भावहीना न भवति, भावौऽपि न रसवर्जितः । अभिनये तदुपयोगितया विभावादि व्यपदेशतया अन्नं स्वादुतां नयेत् तथैव बावा रसाश्तैव परस्परं भावयन्ति।

अनेन ज्ञायते यत् - रसभावयोः सम्बन्धः अन्वय- व्यतिरेकसम्बन्धो विद्यते । एकं विना अपरस्य स्थितेः कल्पना असम्भवमेव। रसम्भावयोः सम्बन्धः वृक्ष-वीजयोः सम्बन्ध इव । अतरुच्यते।-

**यथा बीजाद्भवेद् वृक्षो वृक्षात्पुष्पं फलं यथा।**

**तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।।[10]**

यथा बीनाद्भवेद् वृक्षो, वृक्षात्पुष्पं , पुष्पात्फलं भवति, बीज एव वृक्षस्य मूलं भवति, तथैव मूलं रसाः भवन्ति तेभ्यो रसेभ्यो भावा व्यवस्थिताः।

**सहायकग्रन्थसूची**

1. साहित्यदर्पणम्, चौखम्बा प्रकाशनम् , वाराणासी।

---

6 ना.शा. 6/34

7 ना.ना.6/35

8 ना.शा.6/36

9 ना.शा.6/38

10 ना. शा. 6/38

2. काव्यप्रकाशः,चौखम्बा प्रकाशनम् , वाराणासी।
3. नाट्यशास्त्रम्, साम्वीदिप्रकाशनम्।
4. रसगङ्गाधरः,चौखम्बा विद्याभवन, वाराणासी।